महारथानां नामानि हरेर्वंशावलिस्तथा ॥
यादवानंत्यमित्येवमुत्तरार्धे निरूपितम् ॥९८॥

इति श्रीमद्वल्लभदीक्षितविरचिता श्रीमद्भागवतदशमस्कंधार्थानुक्रमणिका समाप्ता ।

# अथ गायत्रीभाष्यम् ।

श्रीकृष्णाय नमः ।

ॐभूर्भुवः स्वः ॐतत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः प्रचोदयात् ॥ अस्यायमर्थः ॥ यद्यपि प्रणवो व्याहृतयश्च तथा भवंति । तथापि तेषामर्थः स्पष्ट एवेति गायत्र्यर्थो निरूप्यते गायत्र्यंतर्गततच्छब्दव्याख्यानं सत्यं परमिति कालत्रयाबाधितं सर्वलोकप्रसिद्धं सत्यं परं श्रेष्ठं पुरुषोत्तमरूपं सर्ववेदप्रसिद्धमिति सवितुरित्युक्तम् प्रसवितुरिति। गायत्री हि वेदमाता वेदत्रयार्थ प्रतिपादिका भवति। तेन निर्विघ्नवाक्प्रसवार्थं गायत्र्या भगवदुपस्थानं कुर्वाणाः गायत्र्यर्थमाहुः । तेन गायत्र्या जगत्प्रसूत्वेन सर्वकर्तृत्वम् । यथा कामधेनोः कल्पवृक्षाच्चिंतामणेर्मंत्रादेश्च जायमानाः पदार्था दृश्यंते न हि ते विकृता भवंति । चतुर्विधपुरुषार्थसिद्ध्यर्थं जगज्जन-

नमित्यर्थः। सर्वजीवानां सर्वपुरुषार्थसिद्ध्यर्थं जगदित्युक्तं भवति। गायत्र्यर्थे हि प्रसवमात्रमुक्तं न स्थितिप्रलयौ। वरेण्यभर्गःशब्दाभ्यां च पश्चात्सूचितौ। वरेण्यमिति भक्तिबीजम्। "यमेवैष वृणुते तेन लभ्यः" इति श्रुतेः। एतेन परस्परवरणमुक्तम्। वरणीयत्वोक्त्या यथा कन्या स्वाभिमतमेव स्वपतित्वेन वृणुते वरो वा तादृशीमेव कन्यां स्वस्त्रीत्वेन, तथा भगवान् स्वदासत्वेनात्मीयत्वेनांगीकरोतीत्युच्यते। तथा च यथा तदनंतरं नान्यत्र विनियोगस्तस्यास्तथैवैतस्यापीति ज्ञापितं भवति। पूर्वं केनापि ज्ञातुमशक्यमित्यर्थः। वरणीयं सुंदरमिति स्वतो दोषाभाव उक्तः। भजनीयगुणात् वदन् सेवकोद्धारमाह। भर्ग इति। संसारनिवृत्तिः भर्जयत्यखिलाविद्यामिति, भर्गश्शब्दः सकारांतो व्याख्यातः। स्वरूपस्फूर्त्यैव सर्वेषां सर्वाविद्यानां नाशक इत्यर्थः। स्वरूपमेवाविद्यानाशकम्। प्रमेयबलमेतत्। देवत्वेन सर्वज्ञत्वम्। अत एव देवस्य धीमहीति समस्तानां तद्ध्यानं सर्वथा हितमिति। धीमहि ध्यायेम प्रीतिं वा कुर्म इत्यर्थः। धियो यो नः प्रचोदयादिति। धियः बुद्धीः प्रचोदयादिति। तेन सर्वप्रेरकत्वमायाति।

प्रकृष्टत्वेन मूलपुरुषोत्तमस्वरूपपर्यंतं चोदयादिति । प्रेरयति फलसंबंधं करोतीत्यर्थः । गायत्री बीजं वेदो वृक्षः । श्रीभागवतं फलमिति फलसंबंधेन । श्रीभागवतप्रतिपाद्यं वेद्यं वास्तवं वस्तु इति । वास्तववस्तुपु "पिबत भागवतं रसमालयम्" इति । रसम् आलयम् आङ् ईषदर्थे लयो मोक्षः यद्रसाग्रे सोऽपि ईषदतितुच्छ इत्यर्थः । मोक्षाधिकारस्तु "ब्रह्मानंदा-त्समुद्धृत्य भजनानंदयोजने । स रसस्तु रससमूहो रास इति रासलीलैकतात्पर्यमित्यर्थः । अत एव रास एव सर्वेंद्रियास्वाद्यसाक्षात्स्वरूपसंबंधः मनोरथांतरूपः "यतो वाचो निवर्तंते अप्राप्य मनसा सह । आनंदं ब्रह्मणो विद्वान् न बिभेति कुतश्चन" इति श्रुतिप्रतिपाद्यः । "रसो वै सः । रसँ ह्येवायं लब्ध्वानंदी भवति" इति श्रुतिः । ननु प्रचोदयादिति गायत्रीचतुर्थ पादः संन्यासाश्रमपर्यंतं प्रेरकत्वमापादयति कथं रासलीलातात्पर्यकत्वमिति चेत्तत्राह । भक्तिमार्गीयसंन्यासस्तु साक्षात्पुष्टिपुष्टिश्रुतिरूपाणां रासमंडलमंडनानाम् । स्वयमेवोक्तः । "संत्यज्य सर्वविषयांस्तव पादमूलं प्राप्ता" इत्यादि चतुर्थाध्याये ताः प्रति भगवता । एवं मदर्थोज्झितलोकवेदस्वानाम्" । इति तस्य स्वा-

त्मत्वेन परमकाष्ठापन्नस्नेहास्पदं प्रभुरेव स्फूर्त्यैति "तत्त्वमसि" इति महावाक्यार्थस्य "तन्मनस्कास्तदालापास्तद्विचेष्टास्तदात्मिकाः । तद्गुणानेव गायंत्यो नात्मागाराणि सस्मरुः" इति सिद्धिः । ननु तद्योऽहं सोऽसौ योऽसौ सोऽहमित्यैक्यम् एवं परस्परं स्वरूपव्यतिहारेण धर्मारोपः तैत्तिरीयके च-" अहमस्मि ब्रह्माहमस्मि" इति पठ्यते । अत्र मध्यस्थं ब्रह्मपदमुभयत्र संबध्यते । तेनावृत्त्या व्यतिहारः । अतो ब्रह्माभेदःसिध्यति । तथा लीला मध्यपातिभक्तानामपि कृष्णोऽहमहं कृष्ण इति भावमुल्लेख्यवाक्यं श्रूयते । तज्ज्ञानं भक्तिफलमिति प्रफुल्लभानं प्रतिवादिनं तत्स्वरूपं बोधयंति । रसात्मकत्वाद्भक्तेः संयोगवियोगात्मकत्वाद्वितीयभावोद्रेके यथेतरेश्रुप्रलापादयो व्यभिचारिभावास्तथाऽतिविगाढभावेन तदभेदस्फूर्तिरप्येकःसः न तु सार्वत्रिकः । तदात्मानं तत्त्वेन विद्धिसंति तं च स्वात्मत्वेन सोऽत्र व्यतिहारपदार्थ इत्यर्थः । अपरं च उद्देश्यविधेयभावत्स्फूर्त्या न ह्यद्वैतज्ञानमस्ति किं तु भावनामात्रम् । भक्तानां तु विरहभावे तदात्मकत्वमेवाखंड । स्फुरति येन लीलाः स्वतः कुर्वते । तद्यथा तथा श्रीमद्भा-

गवतदशमस्कंधविवृतौ प्रपंचितमस्माभिः । एवं सति मुख्यं यदद्वैतज्ञानं । तद्भक्तिभावैक देश-व्यभिचारिभावेष्वेकतर इति सर्षपस्वर्णाचलयोरिव ज्ञानभक्त्योस्तारतम्यं कथं वर्णनीयमिति भावः । भक्तिमार्गीयसंन्यासे चतुर्थपादगायत्र्यर्थस्तु । योऽहं सोऽसौ योऽसौसोऽहमिति यः पुरुषोत्तमः सोऽहं भक्तः फलप्रकरणप्रथमाध्याये बाहुप्रसार इति भिन्न-संयोग उक्तः । द्वितीयाध्याये "अंतर्हिते भगवति" । इत्यादिविप्रयोगेऽसौ उभयत्र एकात्मको भवति । द्वितीये योऽसौ तृतीयाध्यायेप्येकात्मनोरेव द्वि-वचनोभयभावात्मकस्फूर्तिः । योऽसौ उभयभावा-त्मकः । चतुर्थाध्याये "तासामाविरभूत्" इत्यादि नोक्तः सोऽहमिति सपुरुषोत्तमः अहं भक्तो भिन्नो भवति तस्मात्पंचमाध्याये संयोगरसेपरमकाष्ठा-पन्नः अनिर्वचनीयरससमूहरासरसाब्धिकल्लोल-सर्वेंद्रियास्वाद्यरसानुभवं करोति वेदोक्तमहा-वाक्यात् "तत्त्वमसि" इति । "अहमस्मि ब्रह्माहम-स्मि" इत्यादिविप्रयोगभावात्मकरसानंदो भवति । संयोगरसे "भगवंस्तवास्मि" इति गद्ये कामाक्षरं पश्चाद्बीजम् । अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम" इति मामेकमेव शरणमात्मानं सर्वदेहि-

नाम् । याहि सर्वात्मभावेन संयास्यस्यकुतोभयः" इत्यादीतिदिक् । अत एव श्रुतिः–"आत्मानं द्वेधाऽपातयत पतिश्च पत्नी चाभवताम्" इति, व्याससूत्रे "लोकवत्तु लीला कैवल्यम्" इति, "सर्वज्ञानस्वरूपं हि ब्रह्म पूर्वं रिरंसया । ततोऽखिलजगद्रूपं भूत्वा तत्रातिदुस्तराः । भक्ताः सर्वं परित्यज्य प्रभुप्राप्त्यै यथा रहः । साक्षात्स्वरूपदानेन परा लीलेयमित्यपि । लीलासंबंधिनस्तत्र सर्वं भगवदात्मकम् । प्रवर्तकत्वतो वेणुनादो वेदात्मकोऽत्र हि" । "यतो वाचो निवर्तंते अप्राप्य मनसा सह" । इति, श्रुतिः "आनंदं ब्रह्मणो विद्वान् न बिभेति । कुतश्चन" इति चेति दिक् ।

इति श्रीमद्वल्लभाचार्यविरचितं गायत्रीभाष्यं संपूर्णम् ।

## अथ गायत्रीव्याख्या ।

श्रीकृष्णः शरणं मम ।

श्रीकृष्णः स्वात्मनः सर्वमुत्पाद्य विविधं जगत् ।
तदासक्तांशबोधाय शब्दब्रह्माभवत्स्वयम् ॥ १ ॥
तत्र सर्गादिभिः क्रीडन्निन्यानंदरसात्मकः ।
निजभावप्रकाशाय गायत्रीरूप उद्बभौ ॥ २ ॥